# Vasa

वासकः सिंहिका वासा भिषङ्माता वसादनी ।
आटरूषः सिंहमुखी सिंही कण्ठीरवी वृषः ॥
शितपर्णी वाजिदन्ता नासा पञ्चमुखी तथा ।
सिंहपर्णी मृगेन्द्राणी नामान्यस्यास्तु षोडश ॥ **(Rjn)**

Vasaka, simhika, vasa, bhisangmata, vasadani, atarupa, simhamukhi, simhi, kanthiravi, vrsha, sitaparni, vajidanta, nasa, panchamukhi, simhaparni and mrgendrani are the 16 synonyms of vasa.

ऊर्ध्वासृक्पित्तशमनी कफकासज्वरापहा ।
कषायतिक्ता वीर्योष्णा शीता वाशा क्षयापहा । **(Mdn)**

Vasa is kashaya, tikta in rasa, usna, sita in verya, pacifies urdhva asrk, pitta, alleviates kapha, kasa, jvara and kshaya.

वासको वातकृत्स्वर्यः कफपितास्रनाशनः ।
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृडर्तिहत् ॥
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः । **(Bpn)**

Vasaka is tikta, tuvara in rasa, laghu in guna, sita in veerya, svarya, hrdya, increases vata, destroys kapha, pitta, asra, trt, arti, cures svasa, kasa, jvara, chardi, meha, kustha and kshaya.

आटरूषो हिमस्तिक्तः पित्तश्लेष्मास्रकासजित् ।
क्षयहृच्छर्दिकुष्ठघ्नो ज्वरतृष्णाविनाशनः ॥ **(Dhn)**

Atarusha is tikta in rasa, hima in veerya, alleviates pitta, slesma, asra, cures kasa, ksaya, hrt vikara, chardi, kustha, jvara and trsna.

वाशा तिक्ता कटुः शीता कासघ्नी रक्तपित्तजित् ।

कामलाकफवैकल्यज्वरश्वासक्षयापहा ॥ **(Rjn)**

Vasa is tikta, katu in rasa, sita in veerya, alleviates kasa, raktapitta, kamala, kapha, vaikalya, jvara, svasa and ksaya.

वाशायां विद्यमामायामाशायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमंर्थमवसीदति ॥ **(Vaidyajeevanam)**

Vasa is useful in curing raktapitta, ksaya and kasa.

सिंहास्या तुवरा तिक्ता हृद्या स्वर्या हिमा लघुः ।
वातला कफपित्तास्रश्वासकासहरा हरेत् ॥
ज्वरमेहारुचिच्छर्दिकुष्ठतृष्णाक्षतक्षयान् ।
क्षयघ्नं वातलं पुष्पं वृषजं कफपित्तजित् ॥ **(Kdn)**

Simhasya is tuvara, tikta in rasa, laghu in guna, hima in veerya, hrdya, svarya, increases vata, alleviates kapha, pitta, asra, svasa, kasa, cures jvara, meha, aruci, chardi, kustha, trsna, ksata, kasya.

Puspa increases vata, alleviates kapha, pitta, ksaya and is vrshaja,

वाशा वृषाटरूषः सिंहमुखः सिंहिका भिषङ्माता ।
वृषको वाशकसंज्ञ शब्दैः पर्यायवाचकैर्गदिता ॥ **(Aa ma)**

Vasha, vrshatrusha, simhamukha, simhika, bhishangmata, vrshaka, vashakasamjna are the synonyms of vasa.

वाशको वाशिका वाशा भिषङ्माता च सिंहिका ।
सिंहास्यो वाजिदन्तः स्यादाटरूषक इत्यपि ॥
अटरूषो वृषनामा सिंहपर्णश्च सः स्मृतः । **(Bpn)**

Vashaka, vashika, vasha, bhishagmata, simhika, simhasya, vajidanta, atarushaka, atarusha, vrshanama, simhaparna are the synonyms.